योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०७०

सप्ततितमः सर्गः ७०

अन्यजगद्ब्रह्मोवाच ।

अथाहं चिन्मयाकाशस्त्वन्याकाशमयीं स्थितिम् ।

परां ग्रहीतुमिच्छामि तेनेहोपस्थितः क्षयः ।। १

महाप्रलयकालेऽस्मिंस्त्यक्तुमेषा मयाधुना ।

मुनीन्द्र नूनमारब्धा तेन वैरस्यमागता ।। २

आकाशत्वाद्यदाद्योऽयं पराकाशो भवाम्यहम् ।

तदा महाप्रलयता वासनायाश्च संक्षयः ।। ३

तेनैषा विरसीभूता मन्मार्गं परिधावति ।

नानुगच्छति को नाम निर्मातारमुदारधीः ।। ४

इहाद्यायं कलेरन्तश्चतुर्युगविपर्ययः ।

प्रजामन्विन्द्रदेवानामद्यैवान्तोऽयमागतः ।। ५

अद्यैव चायं कल्पान्तो महाकल्पान्त एव च ।

ममायं वासनान्तोऽद्य देहव्योमान्त एव च ।। ६

तेनेयं वासना ब्रह्मन्क्षयं गन्तुं समुद्यता ।

क्वेव पद्माकराशोषे गन्धलेखावतिष्ठताम् ।। ७

यथा जडाब्धिलेखाया जायते लहरी चला ।

वासनायास्तथैवेच्छा मुधोदेत्यपकारणम् ।। ८

आभिमानिकदेहाया वासनायाः स्वभावतः ।

अस्या आत्मावलोकेच्छा स्वयमेवोपजायते ।। ९

आत्मतत्त्वं नु पश्यन्त्या धारणाभ्यासयोगतः ।

दृष्टोऽनया भवत्सर्गो वर्गव्यग्रनिरर्गलः ।। १०

अनयाम्बरसंचारपरयाद्रिशिरःशिला ।

दृष्टा स्वजगदाधारभूतास्माकं तु खात्मिका ।। ११

एतद्यस्मिञ्जगद्यत्र तद्दृषत्त्वं जगद्गिरौ ।

अस्मज्जगत्पदार्थेषु संत्यन्यानि जगन्त्यपि ।। १२

वयं तानि न पश्यामो भेददृष्टौ स्थिता इमे ।

बोधैकतां गतास्त्वाशु पश्यामस्तानि वीक्षणात् ।।१३

घटे पटे वटे कुड्ये खेऽनलेऽम्भसि तेजसि ।

जगन्ति सन्ति सर्वत्र शिलायामिव सर्वदा ।। १४

जगन्नाम मुधा भ्रान्तिः किल स्वप्नपुरोपमा ।

मिथ्यैवेयं क्व नामासौ चिद्रूपास्त्यथ नास्ति च ।। १५

परिज्ञाता सती येषामेषा चिन्नभसैकताम् ।

गता ते न विमुह्यन्ति शिष्टास्तु भ्रमभाजनम् ।। १६

अथान्यधारणाभ्यासात्स्वविरागवशोदितम् ।

साधयन्त्याऽर्थमात्मीयं दृष्टस्त्वमनया मुने ।। १७

इति मायेव दुष्पारा चिच्छक्तिः परिजृम्भते ।

इत्थमाद्यन्तरहिता ब्राह्मी शक्तिरनामया ।। १८

प्रवर्तन्ते निवर्तन्ते नेह कार्याणि कानिचित् ।

द्रव्यकालक्रियाद्योता चितिस्तपति केवलम् ।। १९

देशकालक्रियाद्रव्यमनोबुद्ध्यादिकं त्विदम् ।

चिच्छिलाङ्गकमेवैकं विद्ध्यनस्तमयोदयम् ।। २०

चिदेवेयं शिलाकारमवतिष्ठति बिभ्रती ।

अङ्गमस्या जगज्जालं मरुतः स्पन्दनं यथा ।। २१

विज्ञानघनमात्मानं जगदित्यवबुध्यते ।

अनाद्यन्तापि साद्यन्ता चित्त्वादिति गतापि चित् ।।

चिच्छिलेयमनाद्यन्ता साद्यन्तास्तीति बोधतः ।

साकारापि निराकारा जगदङ्गेति संस्थिता ।। २३

यद्वत्स्वप्ने चिदेव स्वं रूपं व्योमैव पत्तनम् ।

वेत्ति तद्वदिदं वेत्ति पाषाणं जगदङ्गकम् ।। २४

न सरन्तीह सरितो न चक्रं परिवर्तते ।

नार्थाः परिणमन्त्यन्तः कचत्येतच्चिदम्बरम् ।। २५

न महाकल्पकल्पान्तसंविदः संविदम्बरे ।

संभवन्ति पृथग्रूपाः पयसीव पयोन्तरम् ।। २६

जगन्ति सन्त्येव न सन्ति शान्ते

चिदम्बरे सर्वगतैकमूर्तौ ।

नभोन्तराणीव महानभोन्त-

श्चित्सन्ति सत्तानि पराम्बराणि ।। २७

वसिष्ठ तद्गच्छ मुने जगत्स्वं

त्वं चासने संप्रति शान्तिमेहि ।

बुद्ध्यादिरूपाणि परं व्रजन्तु

वयं बृहद्ब्रह्मपदं प्रयामः ।। २८

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० निर्वाणप्रकरणे उ० पा० शिलान्तर्जगत्पितामहवाक्यानि नाम सप्ततितमः सर्गः ।।७०।।